শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭৯

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭৯

*রুক্মিণীস্ৱযংৱরৱর্ণনম্*

বলসমেতবলানুগতো ভৱান
পুরমগাহত ভীষ্মকমানিতঃ।
দ্ৱিজসুতং ত্ৱদুপাগমৱাদিনং
ধৃতরসা তরসা প্রণনাম সা॥ ১ ॥

ভুৱনকান্তমৱেক্ষ্য ভৱদ্ৱপু-
র্নৃপসুতস্য নিশম্য চ চেষ্টিতম্।
ৱিপুলখেদজুষাং পুরৱাসিনাং
সরুদিতৈরুদিতৈরগমন্নিশা॥ ২ ॥

তদনু ৱন্দিতুমিন্দুমুখী শিৱাং
ৱিহিতমঙ্গলভূষণভাসুরা।
নিরগমদ্ভৱদর্পিতজীৱিতা
স্ৱপুরতঃ পুরতঃ সুভটাৱৃতা॥ ৩ ॥

কুলৱধূভিরুপেত্য কুমারিকা
গিরিসুতাং পরিপূজ্য চ সাদরম্।
মুহুরযাচত তত্পদপঙ্কজে
নিপতিতা পতিতাং তৱ কেৱলম্॥ ৪ ॥

সমৱলোককুতূহলসঙ্কুলে
নৃপকুলে নিভৃতং ত্ৱযি চ স্থিতে।
নৃপসুতা নিরগাদ্ গিরিজালযাত
সুরুচিরং রুচিরঞ্জিতদিঙ্মুখা॥ ৫ ॥

www.prapatti.com

ভুৱনমোহনরূপরুচা তদা
 ৱিৱশিতাখিলরাজকদম্বযা।
ত্বমপি দেৱ কটাক্ষৱিমোক্ষণৈঃ
 প্ৰমদযা মদযাঞ্চকৃষে মনাক্॥ ৬ ॥

ক্বনু গমিষ্যসি চন্দ্ৰমুখীতি তাং
 সরসমেত্য করেণ হরন্ ক্ষণাত্।
সমধিরোপ্য রথং ত্বমপাহৃথা
 ভুৱি ততো ৱিততো নিনদো দ্বিষাম্॥ ৭ ॥

ক্বনু গতঃ পশুপাল ইতি ক্ৰুধা
 কৃতরণা যদুভিশ্চ জিতা নৃপাঃ।
ন তু ভৱানুদচাল্যত তৈরহো
 পিশুনকৈঃ শুনকৈরিৱ কেসরী॥ ৮ ॥

তদনু রুক্মিণমাগতমাহৱে
 ৱধুমুপেক্ষ্য নিবধ্য ৱিরূপযন্।
হৃতমদং পরিমুচ্য বলোক্তিভিঃ
 পুরমযা রমযা সহ কান্তযা॥ ৯ ॥

নৱসমাগমলজ্জিতমানসাং
 প্ৰণযকৌতুকজৃম্ভিতমন্মথাম্।
অরমযঃ খলু নাথ যথাসুখং
 রহসি তাং হসিতাংশুলসন্মুখীম্॥ ১০ ॥

ৱিৱিধনর্মভিরেৱমহর্নিশং
 প্ৰমদমাকলযন্ পুনরেকদা।
ঋজুমতেঃ কিল ৱক্ৰগিরা ভৱান
 ৱরতনোরতনোদতিলোলতাম্॥ ১১ ॥

তদধিকৈরথ লালন কৌশলৈঃ
 প্ৰণযিনীমধিকং সুখযন্নিমাম্।
অযি মুকুন্দ ভৱচ্চরিতানি নঃ
 প্ৰগদতাং গদতান্তিমপাকুরু॥ ১২ ॥



www.prapatti.com

**********

www.prapatti.com